हिमाचल-संस्कृत-अकादमी-नवदेहलीस्थ-श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयः
तथा च तारिणी-राजकीय-स्नातकोत्तर-संस्कृत-महाविद्यालय-सोलनम्, इत्येतेषां

संयुक्त-तत्त्वावधाने द्विदिवसीय-राष्ट्रिय-सङ्गोष्ठी

अभिनवकालिदासस्य प्रो.केशवरामशर्मणः साहित्ये भारतीयज्ञानपरम्परायाः तत्त्वानि



आयोजनस्थलम्
तारिणी-राजकीय-स्नातकोत्तर-संस्कृत-महाविद्यालयः,
सोलनम्, हिमाचलप्रदेशः

दिनाङ्कः 16, 17 नवम्बर 2026

भाषा – संस्कृतम्, हिन्दी, आङ्ग्लम्
पञ्जीकरण का आरम्भः 28.10.2026
शोधपत्रसारांश प्राप्त होने हेतु अन्तिम तिथि : 08.11.2026



१. जन्मपरिचयः - महामहोपाध्याय- प्रो. केशवरामशर्मणः जन्म वि.सं. १९९७ तमे वर्षे मार्गशीर्षमासे भौमवासरे, तदनुसारेण १५ नवम्बर १९४० ख्रीष्टाब्दे, हिमाचलप्रदेशस्य शिमलाजनपदान्तर्गत-ठियोगतहसीलस्थे जराशीग्रामे अभवत्। तेषां पिता स्व. श्रीजयवन्तरामशर्मा, माता च स्व. श्रीमती बुद्धिदेवी शर्मा आस्ताम्। ते शाण्डिल्यगोत्रीयाः, माध्यन्दिनीशाखाध्यायिनः, यजुर्वेदिनः, विशुद्धसनातनिब्राह्मण कुलोत्पन्नाः आसन्। एतत् कुलं तपसा, विद्यया, सदाचारेण च सर्वदा विराजितम्।

२. शिक्षादीक्षा - आचार्यवर्याणां प्रारम्भिकी शिक्षा राजकीयमाध्यमिकविद्यालये, धमांदरीस्थाने सम्पन्ना। ततः फागूग्रामनिवासिनः प्रसिद्धस्य पण्डितश्रीरतीरामशर्मणः सान्निध्ये द्वौ वर्षौ यावत् कर्मकाण्डज्योतिषशास्त्रयोः अध्ययनं कृतम्। ततः प्रातःस्मरणीयाचार्यदिवाकरदत्तस्य मार्गदर्शने राजकीयनेहरूसंस्कृतमहाविद्यालयात् शिमलातः १९६० ख्रीष्टाब्दे शास्त्रीपरीक्षां प्रथमश्रेण्या उत्तीर्य, पञ्जाबविश्वविद्यालयात् चण्डीगढ़ात् १९६३ ख्रीष्टाब्दे दर्शनाचार्योपाधिं कीर्तिमानेन प्रथमस्थानेन प्राप्तवान्। ततः १९७२ ख्रीष्टाब्दे हिमाचलप्रदेशविश्वविद्यालयात् एम.ए. (संस्कृत) तथा १९७७ ख्रीष्टाब्दे एम.फिल. (संस्कृत) इति उभय्यामपि उपाध्योः स्वर्णपदकेन सह प्रथमस्थानं प्राप्तवान्।

३. अध्यापनकार्यम् -
आचार्यवर्यैः राजकीयतारिणीस्नातकोत्तरसंस्कृतमहाविद्यालये सोलने (१९६४-१९७४), राजकीयस्नातकोत्तरमहाविद्यालये कुल्लूनगरे (१९७४-१९७९), राजकीयस्नातकोत्तरमहाविद्यालये सोलने (१९७९-१९९६) तथा राज्यशिक्षाप्रशिक्षणानुसन्धानसंस्थाने (SCERT) सोलने (१९९६-१९९८) च अध्यापनकार्यं कृतम्। एवं त्रयस्त्रिंशद्वर्षषण्मासपर्यन्तं सततां सारस्वतीं सेवां कुर्वन्तः सहस्रशः शिष्यान् संस्कृतसंस्कारैः संस्कृतान् अकुर्वन्।

४. साहित्यिकम् अवदानम् -
आचार्यवर्याणां साहित्यसृष्टिः बहुविधा विविधा च। तेषां प्रमुखाः ग्रन्थाः इमे – हिमाचलवैभवम् महाकाव्यम्, श्रीशालग्रामचरितम् महाकाव्यम्, श्रीभुवनेश्वरीचरितम्,
आचार्यदिवाकरदत्तचरितम्,
शतकचतुष्टयम् (मातृभूमिशतकम्, दर्शनार्णवरत्नशतकम्, भारतशतकम्, संस्कृतशतकम्)
अभिनवकविताञ्जलिः, भारतीयदर्शनम्, तरणित्रयम् – शतकत्रयम्, ध्रुवचरितम्, भागवतसारसमाहारः, अनुभूतिशतकम्, सोलनशतकम्, मनसि सप्तशल्यानि इत्यादयः।

५. सम्मानपुरस्काराः -
आचार्यवर्याः अनेकैः राष्ट्रीयैः अन्ताराष्ट्रियैश्च सम्मानैः विभूषिताः – राष्ट्रपतिसम्मानः, महामहोपाध्यायः, हिन्दीसाहित्यसम्मेलनम्, प्रयागराजः, २०१८,
अभिनवकालिदासः – काशीविद्वत्परिषद्, २०१९,
विद्यावाचस्पतिः – अखिलभारतीयविद्वत्परिषद्, दिल्ली, २०२३,
हिमाचलगौरवः – हिमाचलप्रदेशसर्वकारः, २०२४, ब्रह्मर्षिः – ब्राह्मणअन्ताराष्ट्रियसंस्था, शङ्कराचार्यकरकमलैः, १९८५,
पण्डितराजः – देववाणीपरिषद्, दिल्ली, २०२१, महाकविकालिदासपुरस्कारः – हिमाचलप्रदेशसर्वकारः, १९९८, अखिलभारतीयविद्वत्सम्मानः – मानवसंसाधनमन्त्रालयः, २०००, अकादमीपुरस्कारः – हिमाचलप्रदेशसंस्कृतअकादमी, २०२२, महाकवि श्रीहर्ष सम्मान: - काशीविद्वत्परिषद्, २०२४.

६. निधनम् - आचार्यवर्याः २६ जून २०२६ ख्रीष्टाब्दे स्वां सांसारिकीं यात्रां सम्पूर्णां कृत्वा गोलोकधाम गताः। तेषां पुण्यस्मृतिः, साहित्यिकं योगदानं च सदा संस्कृतजगति प्रेरणास्रोतः भविष्यति।

हिमाचल संस्कृत अकादमी,
तारिणी राजकीय स्नातकोत्तर संस्कृत महाविद्यालय सोलन
तथा
श्रीलाल बहादुर शास्त्री केंद्रीय संस्कृत विश्वविद्यालय नयी दिल्ली
के संयुक्त तत्वावधान में

द्विदिवसीय राष्ट्रीय संगोष्ठी

दिनांक 16 व 17 नवम्बर 2026
स्थान – राजकीय संस्कृत महाविद्यालय सोलन

विषय:

अभिनवकालिदासस्य प्रो.केशवरामशर्मण: साहित्ये भारतीयज्ञानपरम्परायाः तत्त्वानि

उपविषया:

- आचार्यकेशवरामशर्मण: साहित्ये ऋषिपरम्परा
- आचार्यकेशवरामशर्मण: साहित्ये गुरुपरम्परा
- आचार्यकेशवरामशर्मण: साहित्ये प्रकृतिचित्रणम्
- आचार्यकेशवरामशर्मण: साहित्ये दार्शनिकतत्त्वानि
- आचार्यकेशवरामशर्मण: साहित्ये लोकपरम्परातत्त्वानि
- आचार्यकेशवरामशर्मण: साहित्ये पर्यावरणतत्त्वानि
- आचार्यकेशवरामशर्मण: साहित्ये नैतिकमूल्यानि
- आचार्यकेशवरामशर्मण: साहित्ये धर्मशास्त्रीयविवेचनम्
- आचार्यकेशवरामशर्मण: साहित्ये काव्यतत्त्वविवेचनम्
- आचार्यकेशवरामशर्मण: साहित्ये पौराणिकविवेचनम्
- आचार्यकेशवरामशर्मण: साहित्ये अध्यात्मविवेचनम्
- आचार्यकेशवरामशर्मण: साहित्ये हिमाचलसंस्कृतिः
- आचार्यकेशवरामशर्मण: साहित्ये देवसंस्कृतिः
- आचार्यकेशवरामशर्मण: साहित्ये रसविमर्शः
- आचार्यकेशवरामशर्मण: साहित्ये अलंकारविमर्शः
- आचार्यकेशवरामशर्मण: साहित्ये छन्दोविमर्शः

अन्यविषयाः हिमालयस्य साहित्यिकः, सांस्कृतिकः, भौगोलिकश्च परिप्रेक्ष्यः



1. वैदिकसाहित्ये हिमालयः	1. Vedic Literature
2. लौकिकसाहित्ये हिमालयः	2. Secular Literature
3. हिमालयक्षेत्रेषु तन्त्रागमपरम्पराः	3. Tantragama Traditions
4. हिमालये पौराणिकपरम्पराः	4. Mythological Traditions
5. हिमालये दर्शनशास्त्रपरम्पराः	5. Philosophical Traditions
6. ज्यौतिषशास्त्रपरम्परायां हिमालयः	6. Astrological Tradition
7. हिमालये धर्मशाश्रपरम्पराः	7. Dharmashastra Traditions
8. हिमालये देवपरम्पराः	8. Divine Traditions
9. ओषधिविज्ञानपरिप्रेक्ष्ये हिमालयः	9. Pharmaceutical/Medical Science
10. भाषाविकासपरिप्रेक्ष्ये हिमालयः	10. Linguistic Development
11. भारतीयज्ञानपरम्परायाः परिप्रेक्ष्ये हिमालयीया लोकसंस्कृतिः	11. Folk Culture in Indian Knowledge System
12. संस्कृतकाव्यानि (हिमालयस्य परिप्रेक्ष्ये)	12. Sanskrit Poetry on Himalayas
13. हिमालयपरिप्रेक्ष्ये महापुरुषाणाम् अवदानम्	13. Contribution of Great Sages 14. Contribution of Great Sages
14. भौगोलिकपरिप्रेक्ष्ये हिमालयः	14. Geographical Perspective
15. हिन्दीसाहित्यपरिप्रेक्ष्ये हिमालयः	15. Hindi Literature Perspective
16. नारीलेखने हिमालयः	16. Himalayas in Women's Writing
	17. Representation of the Himalayas in literature
	18. Contribution of the writers from the Himalayan Region in Literary Corpus

हिमालयः भारतीयसंस्कृतेः आधारस्तम्भः

पञ्जीकरण (Registration)

Offline at the college.

Fee Details: Through NEFT/UPI/CASH

शिक्षक (Academicians, Teachers): **800/-**
शोधच्छात्र (Research Scholars): **500/-**



खाता संख्या (A/c Number): 20047427745
बैंक का नाम (Bank Name): STATE BANK OF INDIA
IFSC: SBIN0004586

स्मरणीय तिथियाँ
Important Dates

Registration starts from: 28.10.2026
Last date for abstract: 08.11.2026

Email: astrosureshbhardwaj@gmail.com

CONTACT: 9418314330, 9418175570, 9459775365, 9402576997